National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 260-263
© 2026 NJHSR
www.sanskritarticle.com

**Soumen Roy**
Research Scholar in Education,
National Sanskrit University,
Tirupati , A.P , India

**Correspondence:**
**Soumen Roy**
Research Scholar in Education,
National Sanskrit University,
Tirupati , A.P , India

# विद्यार्थिनां चरित्रनिर्माणे अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य योगदानम्

## (Contribution of Akhil Bharat Vivekananda Yuva Mahamandal to Character Building among Students)

**Soumen Roy**

**सारांशः ( ABSTRACT)**

भारतीयशिक्षापरम्परायां चरित्रनिर्माणस्य महत्त्वपूर्णं स्थानं वर्तते। शिक्षा केवलं ज्ञानस्य सञ्चयः न, अपितु मानवस्य शरीरस्य, मनसः, बुद्धेः, हृदयस्य च समन्वितविकासस्य प्रक्रिया अस्ति। स्वामीविवेकानन्दस्य शिक्षादर्शनस्य मूलाधारः मानव-निर्माणं तथा चरित्रनिर्माणम् अस्ति। तस्य विचारान् युवसमाजे व्यवस्थितरूपेण प्रसारयितुं अखिलभारतीय-विवेकानन्द-युवामहामण्डलेन दीर्घकालं यावत् कार्यं क्रियते।

अस्य शोधपत्रस्य मुख्योद्देश्यं विद्यार्थिनां चरित्रनिर्माणे अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य ऐतिहासिकयोगदानस्य अध्ययनम् अस्ति। शोधे ऐतिहासिक-वर्णनात्मक-पद्धतेः उपयोगः कृतः। प्राथमिकस्रोतत्वेन संस्थायाः आधिकारिकप्रकाशनानि, वार्षिकप्रतिवेदनानि, Vivek-Jivan इति पत्रिका, संस्थागतकार्यक्रमविवरणानि तथा उपलब्धाः अभिलेखीयसामग्रीः विचारिताः। द्वितीयकस्रोतत्वेन स्वामीविवेकानन्दस्य शिक्षाविषयकविचाराः, तस्य जीवनसम्बद्धाः ग्रन्थाः तथा आधुनिकशोधसाहित्यं परिगणितम्।

अध्ययनेन ज्ञायते यत् महमण्डलस्य कार्यस्य केन्द्रबिन्दुः केवलं युवानां बौद्धिकप्रबोधनं न, अपितु अभ्यासाधारितं चरित्रनिर्माणम् अस्ति। अध्ययनचक्राणि, युवा-प्रशिक्षणशिबिराणि, वार्षिक-अखिलभारतीय-युवा-प्रशिक्षणशिबिरम्, किशोरकार्यक्रमाः, शैक्षिकसेवा, सामाजिकसेवा तथा विविधाः जीवननिर्माणपरकाः गतिविधयः विद्यार्थिनां नैतिक-सामाजिक-व्यक्तित्वविकासाय अवसरं प्रददति। ऐतिहासिकदृष्ट्या महमण्डलस्य विशेषता तस्य दीर्घकालीन-संगठित-युवान्दोलनरूपेण दृश्यते।

**प्रमुखशब्दाः:** स्वामीविवेकानन्दः, अखिलभारतीय-विवेकानन्द-युवामहामण्डलः, चरित्रनिर्माणम्, युवाशिक्षा, मानव-निर्माणम्, विद्यार्थी।

### 1. प्रस्तावना

शिक्षा मानवजीवनस्य विकासस्य प्रमुखं साधनम् अस्ति। प्राचीनभारतीयचिन्तने शिक्षा केवलं पुस्तकीयज्ञानप्राप्तिपर्यन्तं सीमिता नासीत्। शिक्षायाः उद्देश्यं मनुष्यस्य आचारस्य, विचारस्य, व्यवहारस्य तथा व्यक्तित्वस्य परिष्कारः आसीत्।

आधुनिककाले अपि चरित्रनिर्माणस्य आवश्यकता न न्यूनतां गता। विज्ञानस्य, प्रौद्योगिक्याः तथा सूचनाविस्फोटस्य युगे विद्यार्थिनः बहुविधैः प्रभावैः परिवेष्टिताः सन्ति। अतः ज्ञानसम्पन्नेन सह मूल्यसम्पन्नः, उत्तरदायी तथा सामाजिकदृष्ट्या संवेदनशीलः नागरिकः निर्मातव्यः।

स्वामीविवेकानन्दस्य शिक्षादर्शने मनुष्यनिर्माणस्य विशेषं महत्त्वम् अस्ति। सः शिक्षां मानवस्य अन्तर्निहितशक्तीनां विकासस्य साधनरूपेण अवलोकितवान्। चरित्रनिर्माणं तस्य शिक्षादर्शनस्य केन्द्रीयतत्त्वेषु अन्यतमम् अस्ति।

एतादृशान् विचारान् संगठितरूपेण युवसमाजे प्रसारयितुं अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य कार्यं महत्त्वपूर्णम् अस्ति। संस्थायाः आधिकारिकविवरणानुसारं महमण्डलस्य यात्रा 1967 तमे वर्षे आरब्धा तथा स्वामीविवेकानन्दस्य मानव-निर्माण-चरित्रनिर्माण-विचारान् संगठित-युवान्दोलनरूपेण प्रसारयितुं संस्थया कार्यं प्रारब्धम्।

**2. अध्ययनस्य उद्देश्याः**

I. अस्य ऐतिहासिकाध्ययनस्य प्रमुखोद्देश्याः निम्नलिखिताः सन्ति—

II. अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य विकासस्य अध्ययनम्।

III. स्वामीविवेकानन्दस्य चरित्रनिर्माणविचारस्य महमण्डलेन स्वीकृतरूपस्य विश्लेषणम्।

IV. विद्यार्थिनां चरित्रनिर्माणे संस्थायाः कार्यक्रमाणां योगदानस्य अध्ययनम्।

V. युवा-प्रशिक्षणशिबिराणां तथा अध्ययनचक्राणां परीक्षणम्।

VI. महमण्डलस्य शैक्षिकसेवायाः चरित्रनिर्माणसम्बन्धस्य अध्ययनम्।

VII. संस्थायाः प्रकाशनानां तथा अभिलेखीयसामग्रीणां महत्त्वस्य परीक्षणम्।

VIII. भारतीययुवान्दोलने महमण्डलस्य स्थानस्य मूल्याङ्कनम्।

**3. शोधपद्धतिः**

प्रस्तुतशोधः ऐतिहासिक-वर्णनात्मक-पद्धत्या सम्पन्नः।

ऐतिहासिकशोधे घटनानां केवलं वर्णनं न क्रियते, अपितु तासां उत्पत्तेः, विकासस्य, परिवर्तनस्य तथा सामाजिकप्रभावस्य कारणानां विश्लेषणमपि क्रियते। प्रस्तुताध्ययने प्राथमिक-द्वितीयकस्रोतयोः आलोचनात्मकपरीक्षणं प्रमुखतया कृतम्।

**3.1 प्राथमिकस्रोताः**

प्राथमिकस्रोतत्वेन निम्नलिखितसामग्रीः महत्त्वपूर्णा अस्ति—

I. अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य आधिकारिकप्रकाशनानि।

II. वार्षिकप्रतिवेदनानि।

III. Vivek-Jivan पत्रिकायाः पुरातनाः तथा वर्तमानाः अङ्काः।

IV. संस्थायाः कार्यक्रमप्रतिवेदनानि।

V. युवा-प्रशिक्षणशिबिरसम्बद्धाः अभिलेखाः।

VI. संस्थागतप्रकाशिताः पुस्तिकाः।

VII. वरिष्ठकार्यकर्तॄणां संस्मरणानि तथा पत्राणि।

VIII. उपलब्धाः भाषणसामग्रीः।

IX. संस्थायाः आधिकारिकप्रतिवेदनपृष्ठे विभिन्नवित्तीयवर्षाणां Annual Reports तथा Impact Statements उपलब्धाः सन्ति, ये संस्थायाः ऐतिहासिककार्यस्य अध्ययनाय महत्त्वपूर्णाः प्राथमिक-स्रोताः भवन्ति।

**3.2 द्वितीयकस्रोताः**

द्वितीयकस्रोतत्वेन स्वामीविवेकानन्दस्य रचनाः, तस्य शिक्षादर्शनसम्बद्धाः ग्रन्थाः, रामकृष्ण-विवेकानन्दसाहित्यं तथा युवाशिक्षा-चरित्रनिर्माणसम्बद्धं शोधसाहित्यं प्रयुज्यते।

**4. ऐतिहासिकपृष्ठभूमिः**

स्वामीविवेकानन्दः भारतीयसमाजस्य पुनरुत्थाने युवाशक्तेः महत्त्वं विशेषतया प्रतिपादितवान्। तस्य दृष्ट्या राष्ट्रस्य निर्माणं केवलं संस्थाभिः अथवा व्यवस्थाभिः न भवति; चरित्रसम्पन्नैः मनुष्यैः राष्ट्रस्य निर्माणं भवति।

महमण्डलस्य आधिकारिकविवरणानुसारं 1967 तमे वर्षे संस्थायाः संगठितयात्रा प्रारब्धा। संस्थायाः लक्ष्यं स्वामीविवेकानन्दस्य मानव-निर्माण-चरित्रनिर्माण-विचारान् युवसमाजे संगठितरूपेण प्रसारयितुम् आसीत्।

अस्य ऐतिहासिकप्रयासस्य वैशिष्ट्यं यत् चरित्रनिर्माणं केवलं भाषणस्य विषयः न कृत्वा अभ्यासस्य विषयः कृतम्। संस्थायाः कार्यदर्शनानुसारं चरित्रं अभ्यासेन निर्मातुं शक्यते तथा तदर्थं संगठितप्रयासः आवश्यकः।

**5. महमण्डलस्य विकासः**

महमण्डलस्य विकासः क्रमशः स्थानीयकेन्द्रेभ्यः व्यापकयुवान्दोलनस्य दिशि अभवत्। संस्थायाः वर्तमानविवरणानुसारं देशस्य विभिन्न-भागेषु 300 तः अधिकानि केन्द्राणि कार्यं कुर्वन्ति।

महमण्डलस्य विकासे नियमितकार्यक्रमाणां महत्त्वपूर्णं योगदानम् अस्ति। तेषु प्रमुखाः सन्ति—

I. अध्ययनचक्रम्।

II. युवा-प्रशिक्षणशिबिरम्।

III. अखिलभारतीय-युवा-प्रशिक्षणशिबिरम्।

IV. प्रादेशिक तथा क्षेत्रीय प्रशिक्षणशिबिराणि।

V. किशोरविकासकार्यक्रमाः।

VI. बालकार्यक्रमाः।

VII. शैक्षिकसेवा।

VIII. निःशुल्क-प्रशिक्षणकेन्द्राणि।

IX. सामाजिकसेवा।

X. चिकित्सा तथा राहतकार्यक्रमाः।

XI. एते कार्यक्रमाः संस्थायाः विचारान् व्यवहाररूपेण परिणमयितुं साधनानि भवन्ति।

**6. Vivek-Jivan इति प्रकाशनस्य भूमिका**

महमण्डलस्य ऐतिहासिकविकासस्य अध्ययनाय Vivek-Jivan विशेषमहत्त्वपूर्णं स्रोतः अस्ति। संस्थायाः आधिकारिकविवरणानुसारं Vivek-Jivan इति द्विभाषिकं मासिकपत्रं 1968 तमे वर्षात् प्रकाशितम् अस्ति।

पत्रिकायाः माध्यमेन विवेकानन्दविचाराः, महमण्डलस्य कार्यपद्धतिः, समसामयिकविषयाः, प्रशिक्षणकार्यक्रमाः तथा युवानां प्रश्नाः चर्च्यन्ते।

अतः Vivek-Jivan केवलं समाचारपत्रिका न, अपितु महमण्डलस्य बौद्धिक-ऐतिहासिक-स्मृतिस्रोतः अपि अस्ति। संस्थायाः आधिकारिकविवरणानुसारं अस्य पत्रस्य सम्पादकीयेषु विवेकानन्दस्य शिक्षाणां सामाजिक-राष्ट्रीयपुनर्निर्माणे प्रयोगसम्बद्धाः विषयाः चर्च्यन्ते।

**7. अध्ययनचक्रस्य भूमिका**

महमण्डलस्य प्रत्येककेन्द्रे नियमितरूपेण अध्ययनचक्रस्य आयोजनं भवति। अस्य मुख्योद्देश्यं स्वामीविवेकानन्दस्य मानव-निर्माण तथा चरित्रनिर्माणसम्बद्धविचाराणां अध्ययनं, चर्चा तथा व्यवहारिक-जीवने तेषां प्रयोगः अस्ति।

अध्ययनचक्रे केवलं पुस्तकपठनं न भवति। सामूहिकचर्चा, प्रश्नोत्तरम्, आत्मचिन्तनम् तथा दैनिकजीवनस्य समस्यासु विवेकानन्दविचाराणां प्रयोगः अपि अस्य अङ्गानि भवन्ति।

एवं अध्ययनचक्रं विद्यार्थिनां बौद्धिकविकासस्य सह नैतिकविकासस्यापि साधनं भवितुमर्हति।

### 8. युवा-प्रशिक्षणशिबिराणि

युवा-प्रशिक्षणशिबिराणि महमण्डलस्य प्रमुखकार्यक्रमेषु अन्तर्भवन्ति। तेषु स्वामीविवेकानन्दस्य जीवनम्, तस्य विचाराः, चरित्रनिर्माणम्, मानसिकएकाग्रता, जीवननिर्माणम्, नेतृत्वम् इत्यादयः विषयाः चर्च्यन्ते।

विशेषतः अखिलभारतीय-युवा-प्रशिक्षणशिबिरं संस्थायाः महत्त्वपूर्णतमं प्रशिक्षणकार्यक्रमं मन्यते। संस्थायाः विवरणानुसारं प्रथमं वार्षिक-अखिलभारतीय-शिबिरं 1967 तमे वर्षे आयोजितम्, तत्र लगभग 100 प्रतिभागिनः आसन्; 2016 तमे वर्षे 50 तमे वार्षिकशिबिरे प्रतिभागिनां संख्या लगभग 2400 पर्यन्तं प्राप्ता।

शिबिरे प्रतिभागिनः केवलं व्याख्यानानि न शृण्वन्ति, अपितु प्रस्तुतविचाराणां व्यवहारिकाभ्यासमपि कुर्वन्ति। एतदेव महमण्डलस्य चरित्रनिर्माणपद्धतेः महत्त्वपूर्णं वैशिष्ट्यम् अस्ति।

### 9. विद्यार्थिनां चरित्रनिर्माणे योगदानम्

महमण्डलस्य चरित्रनिर्माणकार्यस्य प्रमुखः लक्ष्यवर्गः युवा तथा विद्यार्थीसमाजः अस्ति। विद्यार्थिजीवनं व्यक्तित्वनिर्माणस्य महत्त्वपूर्णः कालः अस्ति। अस्मिन् काले विकसिताः आदतयः तथा मूल्यव्यवहाराः भाविजीवनस्य आधारं निर्मान्ति।

महमण्डलस्य कार्यक्रमेषु निम्नलिखितचरित्रगुणानां विकासाय विशेषः अवसरः प्राप्यते—

#### 9.1 आत्मानुशासनम्

नियमितजीवनम्, समयपालनम् तथा स्वकर्तव्यस्य पालनम् आत्मानुशासनस्य आधाराः सन्ति। प्रशिक्षणशिबिरस्य सामूहिकजीवनं विद्यार्थिषु अनुशासनस्य अभ्यासं जनयितुं शक्नोति।

#### 9.2 सत्यनिष्ठा

स्वामीविवेकानन्दस्य जीवनविचाराः सत्यं, निर्भीकता तथा नैतिकदृढतां महत्त्वपूर्णं मन्यन्ते। एते विचाराः विद्यार्थिनां नैतिकनिर्णयक्षमतां विकसितुं प्रेरयन्ति।

#### 9.3 आत्मविश्वासः

विवेकानन्दविचारस्य प्रमुखः पक्षः आत्मशक्तौ विश्वासः अस्ति। प्रशिक्षणकार्यक्रमेषु सहभागिता विद्यार्थिषु स्वशक्तेः प्रति विश्वासं वर्धयितुं शक्नोति।

#### 9.4 सेवाभावना

महमण्डलस्य सामाजिकसेवाकार्यक्रमाः विद्यार्थिनः समाजस्य प्रति उत्तरदायित्वं ज्ञातुं प्रेरयन्ति। शिक्षायाः तथा सेवायाः समन्वयः चरित्रनिर्माणस्य व्यवहारिकरूपं प्रदर्शयति।

#### 9.5 नेतृत्वम्

सामूहिककार्येषु सहभागिता, कार्यक्रमव्यवस्थापनम् तथा उत्तरदायित्वस्वीकारः विद्यार्थिषु नेतृत्वक्षमतां विकसितुं शक्नोति।

### 10. शैक्षिककार्यक्रमाः तथा चरित्रनिर्माणम्

महमण्डलस्य कार्यं केवलं प्रशिक्षणशिबिरेषु सीमितं नास्ति। संस्थायाः आधिकारिकविवरणानुसारं कतिपयाः इकाइयः विद्यालयान् चालयन्ति तथा निःशुल्क-कोचिङ्ग-केन्द्राणि अपि संचालयन्ति। एतेषु शैक्षिककार्यक्रमेषु विद्यार्थिनां चरित्रनिर्माणाय विशेषध्यानं दीयते।

एतेन स्पष्टं भवति यत् संस्थायाः दृष्ट्या शैक्षिकसफलता तथा चरित्रनिर्माणं परस्परविरोधिनौ न स्तः। अपितु ज्ञानस्य सह चरित्रस्य विकासः आवश्यकः इति संस्था मन्यते।

### 11. किशोर तथा बालकार्यक्रमाः

महमण्डलः किशोरावस्थां मानवजीवनस्य अत्यन्तमहत्त्वपूर्णां अवस्थां मन्यते। संस्थायाः विशेषकिशोरविकासकार्यक्रमाः किशोराणां आयुस्तरानुकूलया पद्धत्या आयोजिताः भवन्ति।

बालानां कृते Vivek Vahini इति विभागः जीवनोपयोगिमूल्यानां विकासाय कार्यं करोति। संस्थायाः विचारानुसारं शरीरस्य, मनसः तथा हृदयस्य समुचितविकासः बाल्यावस्थातः एव आरम्भणीयः।

एतादृशकार्यक्रमाः चरित्रनिर्माणस्य दीर्घकालीनप्रक्रियायाः आधारं निर्मान्ति।

### 12. सामाजिकसेवा तथा चरित्रनिर्माणम्

चरित्रस्य वास्तविकपरीक्षा व्यवहारिकजीवने भवति। अतः सामाजिकसेवा चरित्रनिर्माणस्य महत्त्वपूर्णं साधनम् अस्ति।

महमण्डलस्य सामाजिकसेवाकार्येषु निःशुल्कचिकित्सा, शैक्षिक-सहायता, विद्यालयाः, निःशुल्क-कोचिङ्ग, राहतकार्याणि, पुस्तकालयाः तथा अन्यसेवाकार्यक्रमाः अन्तर्भवन्ति।

सेवाकार्ये सहभागीभूय विद्यार्थी स्वार्थकेन्द्रितदृष्टेः परं गत्वा समाजस्य आवश्यकतानां विषये चिन्तयितुं शक्नोति। अतः सेवा चरित्रनिर्माणस्य प्रयोगात्मकपक्षः भवति।

### 13. स्वामी रङ्गनाथानन्दस्य योगदानम्

महमण्डलस्य ऐतिहासिकविकासे रामकृष्णपरम्परायाः वरिष्ठसंन्यासिनां प्रेरणा उल्लेखनीया अस्ति। संस्थायाः आधिकारिकसामग्रीनुसारं स्वामी रङ्गनाथानन्दः महमण्डलस्य युवा-प्रशिक्षणशिबिरेषु अनेकवारं भाषणं कृतवान् तथा पत्रैः आशीर्वादमपि प्रदत्तवान्। ओडिशायां महमण्डलस्य कार्यक्रमेषु सः अनेकवारं सहभागी अभवत्।

स्वामी रङ्गनाथानन्दस्य दृष्ट्या महमण्डलस्य मूलकार्यं विवेकानन्दस्य महान् विचारान् युवसमाजे जीवन्तं कर्तुं तथा चरित्रसम्पन्नयुवशक्तेः निर्माणं कर्तुं सम्बन्धितम् आसीत्। तस्य समर्थनं महमण्डलस्य ऐतिहासिकविकासस्य महत्त्वपूर्णं पक्षम् अस्ति।

### 14. ऐतिहासिकस्रोतत्वेन संस्थागतसामग्री

ऐतिहासिकशोधे संस्थागतप्रकाशनानां विशेषं महत्त्वं भवति। महमण्डलस्य Vivek-Jivan, Vivek-Anjan, वार्षिकप्रतिवेदनानि तथा अन्याः पुस्तिकाः संस्थायाः विचाराणां, कार्यक्रमाणां तथा विकासस्य दीर्घकालीनं दस्तावेजीकरणं कुर्वन्ति।

संस्थायाः आधिकारिकसामग्रीनुसारं Vivek-Anjan हिन्दीभाषायां त्रैमासिकरूपेण प्रकाशितं भवति।

अतः भाविशोधकर्तृभिः एतेषां प्रकाशनानां कालक्रमानुसारं अध्ययनं कृत्वा महमण्डलस्य कार्यपद्धतेः परिवर्तनं, विस्तारं तथा सामाजिक-प्रभावं विश्लेषणीयम्।

### 15. ऐतिहासिकविश्लेषणम्

महमण्डलस्य ऐतिहासिकयात्रायां त्रयः प्रमुखाः पक्षाः दृश्यन्ते—

**प्रथमः** — विचाराधारात्मकः पक्षः।

स्वामीविवेकानन्दस्य मानव-निर्माण तथा चरित्रनिर्माणविचारः संस्थायाः मूलाधारः अभवत्।

**द्वितीयः** — संगठनात्मकः पक्षः।

विचारस्य स्थायीप्रभावाय संस्थया स्थानीयकेन्द्राणि, अध्ययन-चक्राणि तथा प्रशिक्षणशिबिराणि विकसितानि।

**तृतीयः** — व्यवहारिकः पक्षः।

शिक्षा, सेवा, प्रशिक्षणम् तथा सामूहिकजीवनस्य माध्यमेन विचाराः व्यवहाररूपेण परिणमिताः।

एतेषां त्रयाणां समन्वयेन महमण्डलस्य कार्यं केवलं विचा-रप्रसारान्दोलनं न भूत्वा जीवननिर्माणपरकं युवान्दोलनम् अभवत्।

## 16. महमण्डलस्य ऐतिहासिकविशेषताः

महमण्डलस्य ऐतिहासिकमहत्त्वं निम्नलिखितबिन्दुषु द्रष्टुं शक्यते—

I. दीर्घकालीन-संगठित-युवान्दोलनरूपेण विकासः।
II. चरित्रनिर्माणस्य केन्द्रस्थानम्।
III. स्वामीविवेकानन्दस्य विचाराणां व्यवहारिकप्रयोगः।
IV. अध्ययनं तथा अभ्यासं प्रति समानं महत्त्वम्।
V. विद्यार्थिनां तथा युवानां सक्रियसहभागिता।
VI. सामाजिकसेवायाः समावेशः।
VII. प्रकाशनानां माध्यमेन विचारानां निरन्तरप्रसारः।
VIII. विभिन्नभारतीयभाषासु साहित्यनिर्माणम्।
IX. किशोर तथा बालवर्गाय विशेषकार्यक्रमाः।
X. प्रशिक्षणशिबिराणां दीर्घकालीनपरम्परा।

## 17. वर्तमानप्रासङ्गिकता

यद्यपि महमण्डलस्य यात्रा 1967 तमे वर्षे आरब्धा, तथापि चरित्रनिर्माणस्य प्रश्नः अद्यापि प्रासङ्गिकः अस्ति। वर्तमानकाले विद्यार्थिनः डिजिटलमाध्यमैः, सामाजिकपरिवर्तनैः तथा तीव्रप्रति-स्पर्धया प्रभाविताः सन्ति।

एतादृशे परिवेशे आत्मानुशासनम्, एकाग्रता, सामाजिकदायित्वम्, सहकार्यभावना तथा नैतिकदृष्टिः अत्यावश्यकाः भवन्ति।

महमण्डलस्य 2026 तमे वर्षस्य कार्यक्रमेष्वपि युवा-प्रशिक्षणशिबिरेषु चरित्रनिर्माणम्, मानसिकएकाग्रता तथा स्वामीविवेकानन्दस्य जीवनसन्देशः चर्चाविषयरूपेण दृश्यते।

अतः संस्थायाः ऐतिहासिकविचाराः केवलं अतीतस्य विषयाः न, अपितु वर्तमानशैक्षिकपरिप्रेक्ष्ये अपि अध्ययनयोग्याः सन्ति।

## 18. निष्कर्षः

अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य इतिहासः स्वामी-विवेकानन्दस्य मानव-निर्माण तथा चरित्रनिर्माणविचाराणां संगठितप्रयोगस्य इतिहासः अस्ति। 1967 तमे वर्षे प्रारब्धा अस्य संस्थायाः यात्रा क्रमशः विभिन्नकेन्द्रेषु, प्रशिक्षणशिबिरेषु, अध्ययनचक्रेषु, शैक्षिकसेवासु तथा सामाजिककार्यक्रमेषु विस्तृता।

विद्यार्थिनां चरित्रनिर्माणस्य दृष्ट्या संस्थायाः योगदानं मुख्यतः त्रिषु क्षेत्रेषु दृश्यते—विचारः, अभ्यासः तथा सेवा। विवेकानन्दस्य विचाराणां अध्ययनं विद्यार्थिनां बौद्धिकदृष्टिं विकसितुं शक्नोति; प्रशिक्षणशिबिराणि तथा अध्ययनचक्राणि तेषां विचारान् व्यवहाररूपेण परिवर्तयितुं अवसरं ददति; सामाजिकसेवा तेषां उत्तरदायित्वबोधं विकसितुं साहाय्यं करोति।

महमण्डलस्य ऐतिहासिकमहत्त्वं तस्य दीर्घकालीनतायां, संगठित-कार्यपद्धतौ तथा चरित्रनिर्माणकेन्द्रितदृष्टौ निहितम् अस्ति। तथापि संस्थायाः प्रभावस्य वैज्ञानिकमूल्याङ्कनाय अधिकाधिकस्वतन्त्र-अभिलेखीय- अध्ययनानि, मौखिकइतिहासः, पूर्वसदस्यानां साक्षात्काराः तथा तुलनात्मकशोधः आवश्यकः भविष्यति।

अतः निष्कर्षतः वक्तुं शक्यते यत् अखिलभारतीय-विवेकानन्द-युवामहामण्डलस्य ऐतिहासिकयोगदानं केवलं युवानां मध्ये विवेकानन्दविचारप्रसारपर्यन्तं सीमितं नास्ति। तस्य मूलप्रयासः चरित्रसम्पन्नस्य, उत्तरदायिनः, सेवाभावसम्पन्नस्य तथा आत्मविश्वा-सयुक्तस्य मानवस्य निर्माणं प्रति केन्द्रितः अस्ति। विद्यार्थिनां चरित्रनिर्माणे एषः दृष्टिकोणः भारतीयशैक्षिकचिन्तनस्य महत्त्वपूर्णं योगदानं प्रदर्शयति।

## 19. शोधस्य सीमाः

प्रस्तुताध्ययनं मुख्यतः उपलब्धासु संस्थागत-स्रोतस्सु तथा आधिकारिकसामग्रीषु आधारितम् अस्ति। अतः भविष्ये निम्नलिखितक्षेत्रेषु अधिकं कार्यं करणीयम्—

संस्थायाः प्रारम्भिकवर्षाणां मूलाभिलेखानाम् अध्ययनम्।

संस्थापककार्यकर्तॄणां तथा वरिष्ठसदस्यानां मौखिकइतिहास-साक्षात्कारः।

विभिन्नराज्यकेन्द्राणां तुलनात्मकाध्ययनम्।

पूर्वविद्यार्थिनां दीर्घकालीनजीवनप्रभावस्य अध्ययनम्।

Vivek-Jivan इत्यस्य 1968 तः वर्तमानकालपर्यन्तं विषयानुक्रमिक-विश्लेषणम्।

वार्षिकप्रतिवेदनानां कालक्रमिकतुलना।

## 20. संदर्भग्रन्थसूची

प्राथमिकस्रोताः

Akhil Bharat Vivekananda Yuva Mahamandal. About Us: The Idea and Overview. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. Study Circle. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. Annual All India Youth Training Camp. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. Education. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. Bulletins: Vivek-Jivan and Vivek-Anjan. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. Annual Reports and Impact Statements. Kolkata: ABVYM.

Akhil Bharat Vivekananda Yuva Mahamandal. News and Activity Reports. Kolkata: ABVYM.

द्वितीयकस्रोताः

Vivekananda, Swami. The Complete Works of Swami Vivekananda. Mayavati: Advaita Ashrama.

Vivekananda, Swami. Lectures from Colombo to Almora. Kolkata: Advaita Ashrama.

Vivekananda, Swami. My Master. Kolkata: Advaita Ashrama.

Ramakrishna Math / Ramakrishna Mission. Publications on Swami Vivekananda's educational and social philosophy.

Vivek-Jivan. Selected archival issues, especially early issues and commemorative numbers.